International Journal of Sanskrit Research 2023; 9(1): 21-23

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2023; 9(1): 21-23
© 2023 IJSR
www.anantaajournal.com
Received: 02-11-2022
Accepted: 13-12-2022

**लोपामुद्रा गोस्वामी**
शोधच्छात्रा, कुमारभास्करवर्म-संस्कृतपुरातनाध्यनविश्वविद्यालयः, असमप्रदेशः भारत

**Corresponding Author:**
**लोपामुद्रा गोस्वामी**
शोधच्छात्रा, कुमारभास्करवर्म-संस्कृतपुरातनाध्यनविश्वविद्यालयः, असमप्रदेशः भारत

# नीर-क्षीरन्यायदृष्ट्या चार्वाकदर्शनम्

**लोपामुद्रा गोस्वामी**

**सारांशः**
**विषादप्यमृतं ग्राह्यं बालादपि सुभाषितम्।**
**अमित्रादपि सद्वृत्तं अमेध्यादपि काञ्चनम्॥**
वादे वादे जायते तत्त्वबोधः। भारतवर्षे पुराकालादेव वाक्स्वतन्त्रतायाः सौविध्यं दृष्टं बहुधा। अस्माकं जीवनलक्ष्यं किं भवेत्, दुःखनाशं कथं कुर्यात्, सुखोपलब्धेः साधनानि कानि कानि इति जिज्ञासायाः समालोचनं भारतवर्षे नैके पण्डिताः अनैकधा प्रतिपादितवन्तः। तस्माद् भिन्नदर्शनपरम्परानां समुदयो जायते भारतवर्षे। विचारेषु भेदाः सन् अपि दर्शनानां हृदयं तु आसीत् दुःखनिवारणनिदानम्। तस्य एव चर्चा समाधानञ्च भारतीयदर्शनेषु दृश्यते। सुखजिज्ञासा एव दर्शनानां विकासमार्गे सोपानम् आसीत्। सुखम् अर्थात् अनुकुलवेदनीयम्। सुखं दुःखञ्च मनसो विकारे स्तः। अतः मनसा सम्बन्धत्वात् दर्शनानां मनोवैज्ञानिकपक्षतोऽपि महत्त्वं दृश्यते। वस्तुतस्तु दर्शनानि अस्मान् जीवनम् उपभोक्तुं शिक्षयन्ति। तेषु चार्वाकाः अपि अस्मान् जीवितुं पाठयति। दर्शनमिदम् अनर्थमूलाम् अन्धविश्वासधारां खण्डयित्वा सुखवादं प्रतिपादयति। अतएव दुःखनिवृत्त्यर्थम् अनर्थपरिहर्तव्यम्,सत्कार्यं कर्तव्यम्, सुखं भोक्तव्यम्, सुखं विस्तारितव्यं जनहिताय स्वकर्मणा इति मतिरासीत् चार्वाकानाम्। परन्तु दर्शनमिदं सर्वदा पण्डितैः अवहेलितं वेदाप्रामाण्यत्वात्। यतोहि भारतीयसंस्कृतौ अध्यात्मवादस्य गहनप्रभावः दृश्यते। अत एव मोक्ष-परलोकादेः अस्वीकरणे अस्माकं मनसि तावत् शंका जायते चार्वाकदर्शनस्य आचारमीमांसायाः सत्यतामुपरि। परन्तु चार्वाकदर्शनेष्वपि राष्ट्रप्रेम, परोपकारः, सदाचारादयः विद्यन्ते। तेषां नैतिकमूल्यानामेव संग्रहणं मया अत्र विहितम्।

**कूटशब्दाः** – चार्वाकदर्शनम्, आचारमीमांसा, सदाचारादयः, राष्ट्रप्रेम।

## प्रस्तावना
यथा वयं लौकिकजीवनेऽपि अनुभवामः यत् यदि अस्माकं पार्श्वे धनं न भवति, तर्हि वयं किमपि कर्तुं न शक्नुमः। धनमेव सुखस्य कारणम्। महाभारतेऽपि उच्यते यत् धनाद् धर्मः ततः सुखम्। तदेव बार्हस्पत्यसूत्रेऽपि अस्ति – अर्थमर्जयेत्[1]। धनमूलं हि जगत्[2]। सर्वाणि तत्र सन्ति। यस्यार्थराशिरस्ति, तस्य मित्राणि धनश्च विद्याश्च गुणविक्रमश्च बुद्धिश्च[3]। यदि धनमेव न स्यात् तर्हि पितुः मातुः सेवामपि वयं कर्तुम् असमर्थो भवामः। अत एव अर्थः आधारोऽस्ति। तेषां प्रमूल्यं प्रधानम् एतदेव अस्ति यत् लोकोऽयं कथं व्यवहारोपयोगिनः स्यात्। अत्र अर्थशब्देन अनर्थदूरीकरणभावः इत्यपि डॉ एइच् एच् सिन्हामहोदयस्य मतम्।[4]

---
[1] बार्हस्पत्यसूत्रम्, 6,7
[2] तत्रैव,6,10
[3] तत्रैव,6,8
[4] https://www.youtube.com/watch?v=ImYOEIxQDw8

अर्थशास्त्रे बृहस्पतिना विद्याद्वयमेव स्वीकृतम् – दण्डः वार्ता च । तदेव चार्वाकसिद्धान्तेऽपि प्रसिद्धः । यथा कोऽपि मनुष्यः यदि असत्कार्ये रतोऽस्ति तर्हि तस्य दण्डः सः अस्मिन् लोके एव प्राप्स्यति, सः दण्डः राजा दास्यति यतोहि भौतिकशरीरेण तत् कार्यं कृतम्, अत एव तदेव शरीरं तस्य दण्डस्य कष्टं प्राप्स्यति, न तु आत्मा । एवम् अनुचितकार्यात् वारणम् अनेन शास्त्रेण प्रतिपादितम् । पुनः अर्थस्यापि परिभाषा प्रदत्तवान् एवम् – यया अस्माकम् अनर्थं न स्यात् । तत्र अनर्थाः उच्यन्ते ये ब्राह्मणाः स्वार्थसिद्धये उपायाः प्रदत्तवन्तः पश्वादिहननम् । बृहस्पतिमते न्यायमेवं स्यात् यस्मात् कोऽपि दुःखी न भवेत् । सर्वेषां समानास्तित्वमस्य दर्शनस्य प्रमूल्यमासीत् । यद्यपि चार्वाकसिद्धान्ते ब्राह्मणानां कर्मणां निन्दा कृता बहुधा तर्कोपस्थापनेन तथापि ब्राह्मणानां कृते तु आचरणं सम्यक् भवेत् इति स्वयं बृहस्पतिना एव सूत्रे उल्लिखितम् एवम् – ब्राह्मणं न हन्याद्दोषदुष्टमपि [5] उत्तमान्नाममन्त्रसिद्धान् विद्याबहुलान् द्विजान् मानयेत्[6] एवं बृहस्पतिसूत्रे बहुधा तस्य प्रमाणं वयं प्राप्नुमः । अर्थात् चार्वाकाः केवलं ब्राह्मणानां धर्मान्धकर्माणि एव तिरस्कुर्वन्ति, न तु ब्राह्मणश्रेणीम् । सर्वेषां कृते समानावधारणा चार्वाकाणाम् आसीत् । ब्राह्मणं बालं वृद्धां स्त्रीं कथम् आचरेत् इत्यादि सर्वं बार्हस्पत्यसूत्रे वर्णितम् । चार्वाकाणाम् अपरः एकः प्रमुल्यः आसीत् कर्मसिद्धान्तः । यः मूल्यः वार्ता वाणिज्यरूपेण अर्थशास्त्रे उक्त अस्ति । चार्वाकसिद्धान्ते कर्मणः महत्त्वं प्रतिपादितम् । यद्यपि चार्वाकदर्शने साक्षात् कर्मसिद्धान्तं निर्णेतुम् असक्षमोऽस्ति, तथापि आचारशास्त्रमाध्यमेन तस्य सिद्धान्तस्य विषये वयं ज्ञातुं शक्नुमः । बार्हस्पत्यसूत्रे कर्मविषये उल्लिख्यते – नित्यकर्म न त्यजेत् [7] । कृषिगोरक्षवाणिज्यानि इत्येवम् [8] । पुनः कर्मणा अर्थमुपार्जयेत् । तत्रापि विश्वासपात्रतां स्यात् । अधर्मेण असदाचरणेन प्रवञ्चनया वा अर्थोपाजनं न कुर्यात् । यथा- अधर्मं नार्जयेत्[9] । अधर्मेण भुज्यमानं सुखमसुहृत्[10] इति । तेषां मते अस्माकं व्यवहारः परसुखाय स्यात् । अर्थात् अन्यस्मै शस्यः विक्रेतव्यः, न तु नष्टः शस्यः दीयेत, अपि तु उत्तमः शस्य एव प्रदातव्यः, यस्मात् अन्येऽपि सुखेन जीवनं यापितुं समर्थः भविष्यन्ति एवं सर्वकल्याणमन्त्रः चार्वाकेण प्रतिपादितः । वाणिज्ये दण्डे च सुखं जीवेत् इति ध्येयमन्त्रं स्वीकृत्य परस्परकल्याणभावनया कार्यं कुर्यात् । पुनः कार्यकरणाय शरीरमपि सम्यक् स्यात्, अत एव सम्यक् भोजनादि अपि कुर्यात् । तस्मादुच्यते घृतं पिबेत्, न तु शरीरानिष्टकारकं मादकद्रव्यादिसेवनस्य उल्लेखं कृतवान् । उच्यते च – आयुर्घृतम्[11] इत्येवम् । घृतं पीत्वा पुर्णोद्यमेन कार्यं कुर्यात् राष्ट्रहिताय इति आशयः । सर्वदा शरीरस्य कृते सुखदायकपक्ष एव स्वीकृतः तैः ।

चार्वाकदर्शने सर्वं राजसिद्धान्तमेव प्रतिपादयति । अतएव देशप्रेमप्रमूल्यानां सर्वत्र उल्लेखो प्राप्यते । तेषां मते स्वकार्यं सम्यक् कृत्वा सुखेन जीवित्वा राष्ट्रसमर्पणभावः सर्वेषां स्यात् तदा एव राष्ट्रमिदं स्वर्गमयं भविष्यति । स्वर्गस्य पृथक्तया स्वीकृतेः आवश्यकता नास्ति । पुनः तेषां सिद्धान्तोपरि एका पङ्क्तिः सुप्रसिद्धा वर्तते यत् – वरमद्य कपोतः न वः मयूरात्[12] । अनेन यत् प्राप्तम्, तत्रैव मनुष्याः सन्तुष्टाः स्युः इति तेषां हृदयम् । अत्रैव मनोवैज्ञानिकपक्ष अपि निहितो वर्तते । चार्वाकाः अस्मिन्नेव लोके सुखेन स्थातुमिच्छन्ति, तदर्थं हिंसादिकं न कृत्वा जनहिताय कार्यं कृत्वा स्वकर्म कृत्वा सुष्ठु भोजनादि-विषयसुखं भुक्त्वा सन्तोषेण जीवति, न तु अदृष्टादि-पारलौकिकविषयभोगस्य कृते लौकिकजीवने तपः करोति, यत् लब्धं तेनैव जीवति । तेषां सुखस्य परिभाषा मनुस्मृतिवदेव अस्ति –

सन्तोषं परमास्थाय सुखार्थी संयतो भवेत् ।
सन्तोषं मूलं हि सुखं दुःखमूलं विपर्ययः ।।[13]

बौद्धदर्शनेऽपि चार्वाकमतसमान एव भावः भगवता बुद्धेन प्रतिपादितः यत् – स्वास्थ्यः सर्वोत्कृष्टः उपहारः, सन्तोषः परमं धनं, विश्वासः महान् सम्बन्धः वर्तते ।

पुनः ये आक्षेपाः सन्ति चार्वाकदर्शने यथा – चार्वाकदर्शनं भोगवादीचिन्तनं प्रेरयति । परन्तु एते आक्षेपास्तु परवर्तिचिन्तकानां स्वस्य चिन्तनमात्रम् । अस्माकं भारतीयदर्शने सर्वत्र विशेषतः तत्त्व-ज्ञान-मीमांसयोः विस्तृतालोचना प्राप्यते, न तावत् आचारमीमांसायाः । अतएव तदतद्दर्शने आचारमीमांसायाः निगूढम् अवगन्तुं तस्य दार्शनिकस्य अन्यानि आचारशास्त्राणि द्रष्टव्यानि । यतोहि भारतवर्षे आचारप्रतिपादयितुं सूत्र-स्मृतिग्रन्था आसन् । अतएव यदि वयं चार्वाकदर्शनस्य प्रमूल्यतत्त्वं ज्ञातुं बृहस्पतेः बार्हस्पत्यसूत्रं पश्यामः तर्हि एतेषाम् आक्षेपाणां समाधानं प्राप्स्यामः । यथा- पूर्वपक्षिणः आक्षिप्यन्ते यत् - चार्वाकदर्शने ऋणं कृत्वा घृतं पिबेत् इति सूत्रेण

[5] तत्रैव,3,38

[6] तत्रैव,3,49

[7] तत्रैव,1,94

[8] तत्रैव,2,4

[9] तत्रैव,2,66

[10] तत्रैव,2,56

[11] साहित्यदर्पणम्, द्वितीयोऽध्यायः, पृ.49

[12] कामसूत्रम्, द्वितीयोऽध्यायः, त्रिवर्गप्रतिपत्तिप्रकरणम्, पृ.33

[13] मनुस्मृतिः, 4.12

**भोगवादीविचारं प्रेरयति इति । कुत्रचित् समाजस्य वर्तमानदशायां मादकद्रव्यपरस्त्रीगमनादौ चार्वाकदर्शनस्य प्रभाव अस्ति इति । परन्तु यदि वयं चार्वाकदर्शनस्य आचारशास्त्रं बार्हस्पत्यसूत्रं पश्यामः तर्हि तत्र भोगवादस्य साक्षात् निन्दामेव पश्यामः । यथा – न मद्यं पिबेत्**[14] **। मृगयातिप्रसंगं च नाचरेत्** [15] **स्तेयं न कुर्यात्** [16] **स्त्रीष्वतिसङ्गादयशो वर्धते** [17] **आयुश्च क्षीयते** [18] **स्त्रीद्यूतपानासक्तान्न सेवयेत्** [19] **आत्मानमनृणी कुर्यात्** [20] **ऋणवाञ्जायते त्रिभिः कामक्रोधलोभैः** [21] **, कामक्रोधमदमात्सर्यपैशुन्यादीन्न कार्येत्**[22]**, एवमनेन तर्केण भोगवादस्य आलिङ्गनजन्यसुखमेव पुमर्थता इत्यत्र दार्शनिकैः अङ्गीकृतस्य देहविलासवादारोपस्यापि खण्डनं जातम् । यतोहि बार्हस्पत्यसूत्रे परस्त्रीगमनादिनां व्यभिचाराणां कुत्रापि उल्लेखो नास्ति ।**

**परिशिष्टः**

एवं दृश्यते यत् चार्वाकदर्शने परोपकार-सदाचारादीनि नैतिकप्रमूल्यानि ग्रथितानि सन्ति । अन्यदर्शनवत् चार्वाकदर्शनेऽपि मनुष्यजीवनस्य परमलक्ष्यं सुखमेव अस्ति, परन्तु तस्य साधनानि अन्यदर्शनवत् न सन्ति, अत्र अर्थ-कामौ सुखसाधनौ मन्येते । अत्र दोषनीय अपि नास्ति, यतोहि पुरुषार्थेषु काम-अर्थयोः प्राधान्यं भारतीयशास्त्रेषु बाहुल्येन दृश्यते । एकमेकं पुरुषार्थम् अधीकृत्यैव ग्रन्थाः विरचिताः । यथा अर्थस्य प्राधान्यं कौटिल्येन दर्शितम्, उत कामस्य प्राधान्यं तस्य सुखसाधनमार्ग अपि कामसूत्र-वेद-पुराणादिषु सुवर्णितः । अतः अस्माभिरपि चार्वाकैः विहिताः आचारादयः विषेष्वमृतवत् राजहंसकृतनीरक्षीरसंग्रहणवत् कर्तव्याः ।

[14] बार्हस्पत्यसूत्रम्,1,16

[15] तत्रैव,1,33

[16] तत्रैव,1,18

[17] तत्रैव,1,34

[18] तत्रैव,1,35

[19] तत्रैव,1,58

[20] तत्रैव,1,91

[21] तत्रैव,1,92

[22] तत्रैव,1,106

**ग्रन्थसूची -**


1. द्विवेदी पार्श्वनाथ. कामसूत्रम्. चौखम्बा सुरभारती प्रकाशन, वाराणसी
2. रेग्मी शेषराज. साहित्यदर्पणम्. चौखम्बा कृष्णदास अकादमी, वाराणसी
3. शास्त्री हरगोविन्द. मनुस्मृतिः. चौखम्बा संस्कृत सीरीज, वाराणसी, 2011
4. बार्हस्पत्यसूत्रम्. पञ्जाब संस्कृत बुक डिपोट, लाहोर, 1921
5. चाणक्यनीतिः. मेपल प्रेस प्राइवेट लिमिटेड, उत्तरप्रदेशः